संस्कृत

आह्निक

# यतीसंस्कार:

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

श्रीगणेशायनमः ॥ अथयतीसंस्कारः ॥ यतीसिध्धगमनोत्तरंगंधपुष्पादि
भिरलंकृत्यतच्छरीरंवाद्यघोषेणबहिर्नीत्वाशुचौदेशेस्थापयित्वापुत्रादिर
न्योवास्नात्वाकृतनित्यक्रियःपुत्रश्चेद्वपनमपिकृत्वा ॥ आचम्यप्राणानाय
म्यमुकगोत्रस्यसिध्धिंगतस्यब्रह्मीभूतस्यामुकशर्मणः परमहंसस्यनारायण
स्वरूपस्यभिक्षोपूजनमहंकरिष्ये ॥ तथायथाविधिवृक्षमूलेगर्भेतच्छरीरस्था
पनंगंगानर्मदामहानद्यांवातच्छरीरंनिक्षेपंचकरिष्ये। इतिसंकल्प्याश्वत्थवृक्षस्या
धस्तान्नदीतटेवायतित्रिदंडप्रमाणंगर्भंव्याहृतिभिः खात्वातत्रगोमयेनोपलिप्य
सप्तव्याहृतिभिस्त्रिभिर्वाप्रोक्ष्यतत्रदर्भानास्तीर्यततोनवघटंजलेनापूर्यतत्रपं
चरत्नानिक्षिप्त्वातेनजलेनसावित्र्यातच्छरीरंप्रोक्ष्य ॥ नारायणंमहाज्ञेयंविश्वा
त्मानंपरायणं ॥ नारायणपरोज्योतिरात्मानारायणःपरः। नारायणपरंब्रह्मत
त्वंनारायणःपरः। नारायणपरोध्याताध्यानंनारायणःपरः। यच्चकिंचिज्जगत्सर्वं

(२)

दृश्यतेश्रूयतेपिवा।।अंतर्बहिश्चतत्सर्वंव्याप्यनारायणस्थितः।।एतैर्मंत्रैः।।
गंगेचयमुनेचैवेत्यादिमंत्रैश्चकलशमभिमंत्र्य।।ॐनमोनारायणायेत्यष्टा
१ क्षरेणमंत्रेणभिक्षुशरीरेनारायणमावाहनायध्यातिरूपंचसंपूज्याभिमंत्र्या
मंत्रैःपुरुषसूक्तेनचाष्टाक्षरेणचनवकुंभोदकेनेवशूरवेना।भिषिच्यप्रक्षाल्य
स्नापयित्वाप्रणवेनाष्टशतवारंसर्वतःप्रोक्ष्यनवकटिसूत्रंकौपिनंचपरिधाप्य
काषायरंजितेनवाससाछाद्याष्टाक्षरेणगंधपुष्पधूपदीपनैवेद्यादिभिस्तंपूज्य
नीराजनंचकृत्वाआवाहनंनजानामीत्यादिनाक्षमाप्य।।विष्णोहव्यंरक्षस्वेति
तच्छरीरंगर्तेनिधायेदंविष्णुरितिदंडं[illegible]स्तेदंडंयदपरिरजसःशुक्रेज्योतिरजा
यत।।तन्नःपर्षदतिद्विषोग्नेवैश्वानरइतिसव्यहस्ते।शिक्यंयेनदेवाः।।पवित्रेणेति
मुखेजलपवित्रंतत्सवितुर्वरेण्यमितिसावित्र्या।उदरेभिक्षापात्रंभूमिर्भूम्नाद्यौर्व १
रिणांतरिक्षंमहित्वा।उपस्थेतेदेव्यदितेग्निमन्नादमन्नाद्यायादधे।।इतिगुह्येकर्म

(2A)

डल्कुंनिधायदशहोत्राभिमंत्रयेत्॥ चित्तिस्स्रुक्॥ चित्तमाज्यं॥ सामाध्वर्युः॥ पृथिवीहोता॥
द्यौरुपवक्ता॥ अग्निर्होता॥ मित्रउपवक्ता॥ सूर्यंतिंचक्षुः॥ शरीरैःमहाहविर्होता॥ उद्गाता॥
इतिदशहोत्राभिमंत्र्य॥ ततोहंसःशुचिषदितिहंसवती॥ परेणनाकंनिहितंगुहायांवि
भ्राजदेतद्यतयोविशंति॥ वेदांतविज्ञानसुनिश्चितार्थाःसंन्यासयोगाद्यतयःशुद्धस
त्वाः॥ तेब्रह्मलोकेतुपरांतकालेपरामृतात्परिमुच्यंतिसर्वे॥ इतिहृदयमालभ्यजपेत्॥
पुरुषसूक्तंभ्रुवोर्मध्येस्पृष्ट्वाजपेत्॥ ब्रह्मजज्ञानमितिमूर्ध्निजपेत्॥ विश्वेशरराटमसी
तिनाभौ॥ देवस्यत्वा॰भ्यामितिकर्णयोः॥ एवंअंगानिस्पृष्ट्वा॥ भूमिर्भूम्निमगान्मातामा
तरमप्यगात्॥ ऋध्यास्मपुत्रैः॥ पशुर्योनोद्वेष्टिसंनियत्तामितिमूर्धानंअश्मनापरशु
नाश्चरेवननारिकेलेनवाभेदयेदितिकेचित्॥ बृहस्थोकेनेत्तु॥ ॐभूर्भुवःस्वश्च्वेसक्ता
मेदयेदित्याह॥ समुच्चयस्तुयुक्तः॥ ततोभूर्भुवस्स्वरोमित्याभिमंत्र्यदर्भैःप्रच्छाद्यपुरुष
सूक्तेनगर्तलवणेनपूरयेत्॥ ततःपृथिवीहोता॥ द्यौरध्वर्युः॥ रुद्रोग्नीत्॥ बृहस्पति
रुपवक्ता॥ वाचस्पतेवाचोवीर्येण॥ संभृततमेनायक्ष्यसे॥ यजमानायवार्यं॥ आसुवस्कृ

यतीसमाधि
पुस्तकं

(3)

रस्मै॥ वाचस्पतिः सोमं पिबति॥ जजनदिंद्रमिंद्रियाय स्वाहा॥ इत्यंतेसंग्रहेण चतुर्होत्रा
परित्तां भूमिमभिमंत्रयेत्॥ इतिकेचित्॥ ततः शृंगालश्वादिरक्षार्थं सम्यग्गर्तं प्रपूरयेदि
२ ति॥ गर्त्ते निक्षेपस्तु दशहोत्राभिमर्शनांते॥ हंसः शुचिषदितिमादिमूर्धानं भेदयेच्छि
ते॥ ॐ भूर्भुवः स्वरोमित्यभिमंत्र्य॥ विलोहत्यरक्षस्येतिस्पृष्ट्वा पाषाणादिनातच्छरीरं
दृढं बध्वा जले महाह्रदे वणावेन स्वाहाकारांतेन भिक्षुदेहं मोचयेत्॥ शिवविष्णवादि
नामकीर्तनपूर्वकं॥ ततः सर्वजनैः सह स्नात्वा ग्रहं गत्वा स्वजनैः सह पायसशष्कुल्यादि
भुंजीत॥ इति यतिसंस्कारः॥ इति समाधिपुस्तकं॥ समाप्तः॥ कृष्णाश्रमसंन्यासीनां॥
शके १७८८ व्ययसंवत्सरे भाद्रपद कृष्ण तृतीयायां इंदुवासरे इदं पुस्तकं चेराज्यक्षेत्रवासी
बाळंभट्टस्य सूनु सदाशिवेन लिखितं॥ शुभं भवतु॥ श्रीकृष्णार्पणमस्तु॥ ॥ २

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

## मूळ प्रत पाहण्यासाठी संपर्क

---

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com